भारत-स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमाला-6

50

# प्रबन्धमञ्जरी




एन० पी० उण्णी



योऽनूवानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रिय-संस्कृत-संस्थानम्

# INTRODUCTION

## MELPUTTŪR NĀRĀYAṆABHAṬṬA

### The author : His life and times

Nārāyaṇabhaṭṭa of Melputtūr[1] is second only to Śaṅkara, the great philosopher in fame, contribution and achievements as a writer of Kerala origin. The name "Melputtūr" stands for his family and it is Sanskritised as 'Uparinavagrāma' by the author himself as also by others. The name is coined as upari = mel (above), nava = putu (new) and grāma = ūr (village). The house was situated near Devī temple at Candanakkāvu about two miles to the north of the reputed temple of Viṣṇu at Tirunāvāya on the northern bank of the river known as Bhāratappuzha (which is referred to as Nilā). His father was Mātṛdatta who was known for his erudition in Mīmāmsā and allied topics. In fact he was an authority on Bhāṭṭa Mīmāmsā — the system popularised by Kumārila Bhaṭṭa. Born in a family of Nampūtiri Brahmins, both the father and the son were the teachers of a host of eminent disciples. At the end of the nyāya section of the Prakriyāsarvasva,

---

1 Ullur. S. Parameswara Iyer Keralasāhityacaritram, Trivandrum, 1962, Vol.II, pp.350-394, Vaṭakkumkur Rajarajavarma Raja, Keralīya Samskrta Sahitya Caritram, Reprinted, Sri Sankaracharya Sanskrit University, Kalady, 1988, Vol. III, pp.1-151.; Dr. K.Kunjunni Raja, Contribution of Kerala to Sanskrit Literature, Madras, 1958, pp.119-152.

# विषयानुक्रमणिका


प्राक्कथनम्

भूमिका

| | | |
|---|---|---|
| 1. | राजसूयप्रबन्धः | १-३५ |
| 2. | दूतवाक्यप्रबन्धः | ३६-६० |
| 3. | पाञ्चालीस्वयंवरप्रबन्धः | ६१-८१ |
| 4. | नालायनीचरितप्रबन्धः | ८२-९० |
| 5. | सुन्दोपसुन्दोपाख्यानप्रबन्धः | ९१-९४ |
| 6. | सुभद्राहरणप्रबन्धः | ९५-१२५ |
| 7. | कौन्तेयाकप्रबन्धः | १२६-१२७ |
| 8. | किरातप्रबन्धः | १२८-१६५ |
| 9. | कैलासवर्णनप्रबन्ध | १६६-१६७ |
| 10. | व्यासोत्पन्तिप्रबन्ध | १६८-१७१ |
| 11. | युधिष्टिराभिकेकप्रबन्ध | १७२-१७९ |
| 12. | मत्स्यावतारप्रबन्ध | १८०-१९४ |
| 13. | वामनावतारप्रबन्ध | १९५-२०४ |
| 14. | नृगमोक्षप्रबन्ध | २०५-२१६ |
| 15. | गजेन्द्रमोक्षप्रबन्ध | २१७-२२८ |
| 16. | सन्तानगोपालप्रबन्ध | २२९-२३१ |

**कृष्णः—**

**सहदेव! त्वमेवेह प्रथमः पाण्डुसूनुषु।**
**अयि वीर! चिरं जीव भविता ते रणोत्सवः॥६०॥**

अथ तदानीं मानिनीजनमौलिरत्नभूता धृष्टद्युम्नसोदरी पञ्चपाण्डवैकप्रियतमा पाञ्चालराजप्रियतनया चिरतरसमधिगतदुःसह-परिभवनिःसहहृदया मुहुर्मुहुर्निरङ्कुरितदुःशासनवक्षोविक्षोभणावलोक-नौत्सुक्यादिव दिवसस्य शतकृत्वः समयावसानदिवसपरिगणनया कथं कथमपि समापितत्रयोदशसंवत्सरा, तत्समाप्तिसमयसम्पाद्यमानसंप्रहारोद्यम-सैन्यसम्भारसम्पत्तिसम्प्रीतचेताः, तदन्तरे पुनः सन्धित्सापिशाचिकावेश-विवशीभावविश्लथप्रकृतीनां विश्ववीराणामपि निजवल्लभानामविज्ञातनिज-परिभवामवज्ञातस्वप्रतिज्ञामधरीकृतशौर्याटोपां विधुरीकृतवैरबन्धामतिमसृणां तादृशीं गिरं नातिदूरनिषण्णा संश्रृण्वती—

**अगणितबहुवैरं कौरवैः सन्धिकामं**
**जिगमिषुमथ कृष्णा कृष्णमालोक्य खिन्ना।**
**विगलितधृतिसारं प्राप्य पार्श्वं पतीनां**
**न्यगददुदितरोषावेशलोलां च वाणीम्॥६१॥**

**द्रौपदी—**

**राज्ञो यत् सहजान्वितस्य रुचितं चित्ते च यत् ते मतं**
**मित्राणामपि सम्मतं तदुचितं सन्धानमेवाधुना।**
**वेणीयं करुणानिधे! कुरुसभामध्ये निबद्धा चिरं**
**स्मर्तव्या गुणकीर्तनेषु सुहृदामेतावदेवार्थये॥६२॥**

इति वदन्तीं निरन्तरोद्वान्तबाष्पाम्बुसन्तानखिन्दानवदनारविन्दां द्रुपदनन्दनामानन्दयन् गोविन्दो मन्दमवादीत्—

**भद्रे पाञ्चालि! वाञ्छा तव खलु नियतं भाविनी किन्तु सन्धौ**
**सोऽहं यत्नं सपत्नैः कुरुसुतकुनयख्यापनायैव कुर्वे।**



राष्ट्रिय-संस्कृत-संस्थानम्

५६-५७, इन्स्टिट्यूशनल एरिया, जनकपुरी,

नई दिल्ली - ११००५८